**Series HRS/1**

कोड नं.
Code No. **52/1**

रोल नं.
Roll No.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुखपृष्ठ पर अवश्य लिखें।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

## सङ्कलनात्मकं मूल्याङ्कनम् - II

## SUMMATIVE ASSESSMENT-II

# संस्कृतम् (सम्प्रेषणाधारितम्)

# COMMUNICATIVE SANSKRIT

*अवधिः : होरात्रयम्]* *[ पूर्णांकाः : 90*

*निर्धारित समय : 3 घण्टे]* *[ अधिकतम अंक : 90*

*Time allowed : 3 hours ]* *[ Maximum marks : 90*

| | |
|---|---|
| खण्डः क : अपठितांश-अवबोधनम् /अपठित-अवबोधन<br>Section A : Unseen Reading Comprehension | 15 अङ्काः |
| खण्डः ख : रचनात्मककार्यम् / रचनात्मक-कार्य<br>Section B : Writing Skills | 15 अङ्काः |
| खण्डः ग : अनुप्रयुक्तव्याकरणम् / अनुप्रयुक्त व्याकरण<br>Section C : Applied Grammar | 30 अङ्काः |
| खण्डः घ : पठित-अवबोधनम् / पठित-अवबोधन<br>Section D : Reading Comprehension | 30 अङ्काः |

***निर्देशाः***

***Instructions***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं।*
*The question paper has four sections.*

*(ii)* *प्रतिखण्डम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर दी गई उत्तर-पुस्तिका में ही लिखने हैं।*
*The answers of each section have to be written in the answer-sheet.*

*(iii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।*
*The answers to each section must be written at one place.*

*(iv)* *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*प्रश्न-पत्र पर उत्तर न लिखें।*
*Don't write answers in the question paper.*

*(v)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।*
*Write the question number according to the question paper.*

*(vi)* *सर्वेषां प्रश्नानाम् उत्तराणि **संस्कृतेन** लेखनीयानि।*
*सभी प्रश्नों के उत्तर **संस्कृत** में लिखिए।*
*Answer all the questions in **Sanskrit.***

## खण्डः क

## Section A

## अपठितांश–अवबोधनम् (अपठित अवबोधन)

## Unseen Reading Comprehension

15 अङ्काः

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following passage and answer the given questions in Sanskrit :

को न जानाति कवीन्द्ररवीन्द्रस्य नाम। सः न केवलं बङ्गप्रदेशस्य अपितु विश्वस्य प्रसिद्धः कविः आसीत्। अनेन विरचितः 'गीताञ्जलिः' इति कवितासङ्ग्रहः अतिप्रसिद्धः। अस्य कवितासङ्ग्रहस्य कृते कविरेषः परमसम्मानितं नोबेलपुरस्कारं प्राप्तवान्। अस्माकं राष्ट्रियगानस्य रचयिता अपि रवीन्द्रः एव। महापुरुषोऽयं विश्वभारतीनामकं विश्वविद्यालयम् अपि अस्थापयत्। एतादृशानां महापुरुषाणां जन्मदात्री भारतभूमिः वस्तुतः धन्या एव।

प्रश्नाः

I. एकपदेन उत्तरत। 1×2=2

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) गीताञ्जलिः केन विरचिता?

(ii) कविरवीन्द्रः कस्य प्रदेशस्य कविः?

II. पूर्णवाक्येन उत्तरत। 2×2=4

पूर्णवाक्य में उत्तर दीजिए।

Answer in a complete sentence.

(i) का वस्तुतः धन्या एव?

(ii) कविरवीन्द्रः किमर्थं नोबेलपुरस्कारं प्राप्तवान्?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। ½×4=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the appropriate answer from the given options.

(क) 'प्राप्तवान्' इति क्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम्?

(i) अस्य (ii) कविः

(iii) पुरस्कारम् (iv) प्रसिद्धः।

(ख) 'अनेन' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) सङ्ग्रहाय (ii) प्रदेशाय

(iii) रवीन्द्राय (iv) विश्वाय।

(ग) 'स्थापितवान्' इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?

(i) प्राप्तवान् (ii) अस्थापयत्

(iii) प्रसिद्धः (iv) सङ्ग्रहः।

(घ) 'सः न .......... कविः' – अत्र कवेः विशेषणपदं किम् ?

(i) विश्वस्य (ii) बंगः

(iii) केवलम् (iv) प्रसिद्धः। 2

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।

Write the appropriate title for this passage in Sanskrit.

2. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित श्लोक को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए :

Read the following shloka and answer the given questions in Sanskrit :

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

परोपकारः पुण्याय पापाय परपीडनम्।।

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

पुराणानि कति सन्ति ?

II. पूर्णवाक्येन उत्तरत। 1×2=2

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

(i) परोपकारेण जनैः किं प्राप्यते ?

(ii) पुराणानि केन विरचितानि ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the appropriate answer from the given options.

(क) 'कथनम्' इत्यर्थे श्लोके क: शब्द: प्रयुक्त: ?

(i) द्वयम् (ii) पीडनम्

(iii) वचनम् (iv) उपकार:।

(ख) 'अपकार:' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?

(i) परोपकार: (ii) परपीडनम्

(iii) वचनद्वयम् (iv) पापाय।

## खण्ड: ख

## Section B

## रचनात्मककार्यम् (रचनात्मक कार्य)

## Writing Skills

**15 अङ्का:**

3. पितरं प्रति लिखितम् अध:पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन: लिखत : ½×10=5

पिता को लिखे गए निम्नलिखित पत्र को दिए गए शब्दों की सहायता से पूर्ण कर पुन: लिखिए :

Complete the following letter written to your father, with the help of the words given in the box and rewrite the same :

मन्दाकिनी-छात्रावास:,

(i) ............................ ।

पूज्या: (ii) ........................!

सादरं प्रणामा: ।

अत्र कुशलम्, तत्राऽस्तु। इदं ज्ञात्वा भवन्त: (iii) ............... भविष्यन्ति यत् गतदिवसे अन्तर्विद्यालयीयसंस्कृत-वादविवाद-प्रतियोगितायां मया (iv) .............. स्थानं प्राप्तम्। क्रीडादिवसेऽपि (v) ............. अहमेव प्रथम: आसम्। अस्य वर्षस्य नवमकक्षाया: वार्षिकपरीक्षायामपि मया एव प्रथमं स्थानं (vi) .............। विद्यालयस्य वार्षिकोत्सवार्थे मया त्रय: पुरस्कारा: (vii) ............... ।

अयं वार्षिकोत्सवः आगामिमङ्गलवासरे आयोजयिष्यते। विद्यालयपक्षतः (viii) .................. ह्य एव प्रेषितम्। अहमपि भवन्तं सूचयामि यत् (ix) ................ सह भवान् अवश्यमेव आगच्छतु। एवं मम (x) .................. भविष्यति। मातृचरणयोः मम प्रणामाः।

भवदीयः पुत्रः,

नरेन्द्रः।


**मञ्जूषा**

| |
|---|
| निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, पितृचरणाः, नवदिल्लीतः, उत्साहवृद्धिः, प्रथमम्, प्राप्स्यन्ते, लब्धम्, मात्रा, प्रसन्नाः। |

4. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन **पञ्च** वाक्यानि लिखत : 2×5=10

नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में लिखिए :

Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below :



**मञ्जूषा**

| |
|---|
| वने, धावति, वानराः, वृक्षाः, कूर्दन्ति, सिंहः, पुष्पाणि, गजः, भल्लूकाः, मृगौ, उष्ट्रः, वृक्षेषु। |

अथवा

**OR**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्च**संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत : 2×5=10

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए :

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box :

''संस्कृतपुस्तकप्रदर्शनी''

**मञ्जूषा**

| |
|---|
| विविधं साहित्यम्, प्रवेशपत्रगृहम्, विभिन्नानि प्रकोष्ठानि, मित्राणि, प्रेक्षागृहम्, संस्कृतनाटकानां मञ्चनम्, पुस्तकानि, प्रदर्शनीपरिसरे, कथापुस्तकानि, ध्वनिमुद्रिकाः, अतीव प्रसन्नता। |

## खण्डः ग
## Section C
## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)
## Applied Grammar

30 अङ्काः

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं **वा** कृत्वा लिखत : 1×4=4

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि **अथवा** सन्धिविच्छेद करके लिखिए :

Write the underlined words of the following sentences after joining **or** disjoining Sandhis :

(i) उभौ + एव मित्रे आस्ताम्।

(ii) जगदीशः सर्वान् रक्षति।

(iii) भवत् + मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि।

(iv) मम अर्थिनस्तु धनलाभमात्रेण संतोषं भजन्ते।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं **वा** प्रदत्तविकल्पेभ्यः चित्वा लिखत : 1×5=5

निम्नलिखित वाक्यों में रेखांकित पदों का समास **अथवा** विग्रह दिए गए विकल्पों में से चुनकर लिखिए :

Choose and write the correct compounded or expounded form of the underlined words of the following sentences :

(क) 'काकः सक्रोधं प्रविश्य कथयति।'

(i) काकेन सह (ii) क्रोधेन सहितम्

(iii) क्रोधं कृत्वा (iv) क्रोधः काकः च।

(ख) 'सर्वेषामेव महत्त्वं विद्यते समयम् अनतिक्रम्य।'

(i) अनतिक्रम्य समयेन (ii) समयानुसारेण

(iii) यथासमयम् (iv) यथासमयात्।

(ग) 'अये ! कथं कथं श्रीकृष्णार्जुनौ युधिष्ठिरः च।

(i) श्रीकृष्णः च अर्जुनः च (ii) श्रीकृष्णौ अर्जुनौ च

(iii) श्रीकृष्णः अर्जुनौ च (iv) श्रीकृष्णम् अर्जुनं च।

(घ) 'दुष्टा बुद्धिः यस्य सः सद्वचनानि तिरस्कृत्य प्राचलत्।'

(i) दुष्टाबुद्धिः (ii) बुद्धिरहितः

(iii) बुद्धिमन्तः (iv) दुष्टबुद्धिः।

(ङ) 'ध्यानमग्नः स्थितप्रज्ञ इव तिष्ठामि।'

(i) स्थितः प्रज्ञः यस्य सः (ii) स्थितः प्रज्ञा यस्याः सा

(iii) स्थिता प्रज्ञा यस्य सः (iv) प्रज्ञा स्थिता यस्याः सा।

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य **वा** समुचितम् उत्तरं लिखत : 1×5=5

निम्नलिखित वाक्यों में रेखाङ्कित पदों के प्रकृति-प्रत्ययों को जोड़कर **या** पृथक् करके उचित उत्तर लिखिए :

Write the underlined words of the following sentences after joining **or** disjoining suffixes to the roots or words :

(i) 'तौ मार्गे क्रीड् + शतृ बालकान् अपश्यताम्।'

(ii) 'प्रयतमानाः' जनाः साफल्यं प्राप्नुवन्ति।'

(iii) 'प्रकृतेः रमणीय + तल् मनोरमा अस्ति।'

(iv) 'काव्यस्य मधुरत्वम् सहृदयाः जानन्ति।'

(v) 'अस्याः अनुज + टाप् दीपिका अस्ति।'

8\. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखतः 1×5=5

निम्नलिखित वाक्यों में रिक्तस्थानों की पूर्ति मञ्जूषा में दिए गए उचित अव्ययों के द्वारा कीजिए :

Fill in the blanks in the following sentences with appropriate indeclinables given in the box :

(i) अहं .................. दिल्लीनगरं गमिष्यामि ।

(ii) ध्वनिं .................. कुरु ।

(iii) भवती अधुना ..................... आगच्छति ।

(iv) .................. परोपकारः क्रियते तावत् शरीरस्य सदुपयोगः ।

(v) नगरात् .................. एकः आश्रमः अस्ति ।

**मञ्जूषा**

| |
|---|
| मा, बहिः, कुतः, यावत्, श्वः । |

9\. प्रदत्तविकल्पेभ्यः उचितसंख्यापदं चित्वा वाक्यानि पूरयत : 1×5=5

दिए गए विकल्पों में से उचित संख्यापद चुनकर वाक्य पूर्ण कीजिए :

Choose the correct numerical words from the options and complete the sentences :

(क) 'वने ............ गजाः विचरन्ति ।'

(i) चत्वारि (ii) चत्वारः

(iii) चतुरः (iv) चतस्रः ।

(ख) '............ बालकयोः पिता नगरम् अगच्छत् ।'

(i) द्वौ (ii) द्वाभ्याम्

(iii) द्वयोः (iv) द्वियो : ।

(ग) '............ स्त्रियः गृहं गच्छन्ति ।'

(i) त्रीणि (ii) त्रयः

(iii) त्रीन् (iv) तिस्रः ।

[P.T.O.

(घ) '............ चन्द्रः तमः हन्ति।'

(i) एकम् (ii) एका

(iii) एकः (iv) एकेन।

(ङ) 'पक्षे ............ दिवसाः भवन्ति।'

(i) पञ्चदशानि (ii) पञ्चदश

(iii) दशपञ्चाः (iv) पञ्चोनदश।

**10.** अधोलिखितवाक्येषु रेखाङ्कितं पदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत : 1×6=6

नीचे दिए गए वाक्यों में रेखांकित पद अशुद्ध है। दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए :

Choose the correct answer from the given options and correct the underlined incorrect word in the following sentences :

(क) 'एते सर्वे मम मित्रम् सन्ति।'

(i) मित्राः (ii) मित्रे

(iii) मित्राणि (iv) मित्रः।

(ख) 'त्वं पाठम् अपठत्।'

(i) अपठताम् (ii) अपठः

(iii) अपठतम् (iv) अपठत।

(ग) 'ते फलानि पतन्ति।'

(i) ताः (ii) सा

(iii) सः (iv) तानि।

(घ) 'ह्यः अस्माकं विद्यालये वार्षिकोत्सवः भविष्यति।'

(i) अभवत् (ii) अभवः

(iii) भवेत् (iv) भविष्यतः।

(ङ) 'अहं नाटकं द्रक्ष्यन्ति ।'

(i) पश्याव : (ii) पश्यसि

(iii) द्रक्ष्यामि (iv) द्रक्ष्यति ।

(च) 'भवान् गृहं गच्छन्तु ।'

(i) भवन्त: (ii) भवत्य:

(iii) भवन्तम् (iv) भवता ।

## खण्ड: घ

## Section D

## पठित-अवबोधनम् (पठित-अवबोधन)

## Reading Comprehension

**30 अङ्का:**

**11.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् संस्कृतेन उत्तराणि लिखत :

निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के संस्कृत में उत्तर लिखिए :

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit :

**(अ) गद्यांश:**

"गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत्-आर्य ! किं सर्वगतं कुशलं वर्तते ? अयथाकालं समागतोऽसि ? सम्प्रति धर्ममति: स: पश्चात्तापेन दग्धमानस: सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चै: अक्रन्दत्। बुद्धिमती सा अवदत् - 'अलं चिन्तया। आपदां तरणि: धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यम: क्रियताम्।"

**प्रश्ना:**

(I) एकपदेन उत्तरत। ½×2=1

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) आपदां तरणि: किं भवति ?

(ii) किं त्यक्त्वा उद्यम: कर्त्तव्य: ?

(II) पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

पश्चात्तापेन दग्धमानसः सः (प्रच्छन्नभाग्यः) किं निवेद्य उच्चैः अक्रन्दत्?

(III) विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 1×2=2

विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the correct answer from the given options.

(क) 'शीघ्रम्' इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम्?

(i) सम्प्रति (ii) इदानीम्

(iii) सपदि (iv) अयथाकालम्।

(ख) 'भार्या' इति कर्तृपदस्य क्रियापदं किम्?

(i) क्रियताम् (ii) असि

(iii) वर्तते (iv) अपृच्छत्।

**(आ) पद्यम्**

"आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्मात् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥"

**प्रश्नाः**

(I) एकपदेन उत्तरत। ½×2=1

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) प्रथमः धर्मः कः?

(ii) प्राणेभ्योऽपि विशेषतः कः रक्षणीयः?

(II) पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

विदुषां वचः किम्?

(III) (क) 'धर्मः' इति पदस्य विशेषणपदं किम् ? 1×2=2

(i) आचारः (ii) वचः

(iii) विशेषतः (iv) प्रथमः ।

(ख) 'मूर्खाणाम्' इतिपदस्य किं विलोमपदं श्लोके प्रयुक्तम् ?

(i) वचः (ii) विदुषाम्

(iii) प्राणेभ्योऽपि (iv) सदाचारम् ।

**(ङ) नाट्यांशः**

"अश्वत्थामा– रे दुष्ट भीम ! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च (स्वगतम्) इदानीं किं करवाणि ? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। (ध्यानं नाटयति, ब्रवीति च) इदम् अपाण्डवाय।

श्रीकृष्णः – पार्थ ! पश्य पश्य । एतत् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण। त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन ! त्वमपि मुञ्च ब्रह्मास्त्रम् एतत् निवारयितुम्।"

**प्रश्नाः**

(I) एकपदेन उत्तरत। ½×2=1

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) द्रोणपुत्रेण किं विमुच्यते ?

(ii) विषमे समये किं शरणम् ?

(II) पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

ब्रह्मास्त्रस्य प्रयोगेण परितः किं प्रसरति ?

1×2=2

(III) विकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत।

विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the correct answer from the given options.

(क) 'दृष्ट्वा' इत्येस्य स्थाने किं पदं नाट्यांशे प्रयुक्तम् ?

(i) स्वगतम् (ii) दृष्टम्

(iii) विलोक्य (iv) पश्य।

(ख) 'मुञ्च' इति क्रियापदस्य कर्तृपदं किम् ?

(i) पार्थ ! (ii) त्वम्

(iii) एतत् (iv) श्रीकृष्ण:।

1×2=2

12. अधोलिखितकथनानां समुचितं भावं विकल्पेभ्य: चित्वा लिखत :

निम्नलिखित कथनों का उपयुक्त भाव विकल्पों में से चुनकर लिखिए :

Choose and write the correct gist of the following sentences from the given options :

(क) 'नीरक्षीरविवेके तु हंसो हंस: बको बक:।'

(i) हंस: बक: च समानौ तयो: कोऽपि भेद: नास्ति।

(ii) दुग्धस्य जलस्य च मध्ये किं दुग्धम् किं जलम् इति विवेकपूर्णे कार्ये एव हंसस्य बकस्य च भेदो दृश्यते।

(iii) हंसस्य बकस्य च वर्ण: श्वेत: अस्ति।

(ख) 'अलं चिन्तया। आपदां तरणि: धैर्यम्।'

(i) धैर्येण आपद: नौका: इव भवन्ति।

(ii) विपत्तौ नर: नदीं तीर्त्वा एव धैर्यं प्राप्नोति।

(iii) यथा नौकासाहाय्येन जना: पारं गच्छन्ति। एवमेव धैर्यबलेन जना: आपद्भ्य: तरन्ति।

13. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत : ½×8=4

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित **दोनों** श्लोकों के अन्वय को पूर्ण कीजिए :

Complete the prose order of the following **two** shlokas by choosing the appropriate words given in the box :

(क) "यत्प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः ।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥"

**अन्वय :–** येन (i) _________ अपि यत् प्रोक्तं तस्य (ii) _________ येन कर्तुं (iii) _________ भवेत् सः (iv) _________ इति ईरितः ।

(ख) "परमापद्गतेनापि नैव तात ! त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥"

**अन्वय :–** (i) _________ परमापद्गतेन अपि (ii) _________ रणे इदम् अस्त्रं (iii) _________ मानुषेषु न (iv) _________ प्रयोक्तव्यम् ।

| मञ्जूषा |
|---|
| विशेषतः, शक्यः, तात !, तत्त्वार्थनिर्णयः, केन, एव, विवेकः, त्वया । |

14. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत : 1×5=5

रेखांकित पदों के आधार पर प्रश्न–निर्माण कीजिए :

Frame the questions on the basis of the underlined words :

(i) 'अरुणस्य प्रदेशः अरुणाचलः ।'

(ii) 'अनृतं वदसि चेत् काकः दशेत् ।'

(iii) 'यूयं प्रक्षेपणयन्त्रेण चित्राणि पश्यथ ।'

(iv) 'छात्राः जलपानाद्, अनन्तरं यास्यन्ति ।'

(v) 'संवत्सरे द्वादश मासाः भवन्ति ।'

15. अधोलिखितवाक्यानि घटनाक्रमानुसारं लिखत : ½×8=4

निम्नलिखित वाक्यों को घटना के क्रम के अनुसार लिखिए :

Write the following sentences in their sequential order :

(i) मातुः आज्ञया ते मिलित्वा निवसन्ति आनन्देन च नृत्यन्ति।

(ii) 'पक्षिणां राजा कः भवेत्' इति विचिन्त्य तत्र विवादः भवति।

(iii) तयोः मध्ये विवादः भवति।

(iv) सर्वे स्वप्रशंसां कुर्वन्ति।

(v) सः काकं कटुवचनानि कथयति।

(vi) तदैव अन्ये अनेके पक्षिणः अपि तत्र प्रविशन्ति।

(vii) एकदा राजहंसः काकस्य ध्वनिं श्रुत्वा कुपितः भवति।

(viii) काकः अपि कुपितः भवति।

16. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत : 1×3=3

रेखांकित पदों के प्रसंगानुसार अर्थ चुनकर लिखिए :

Choose and write the correct contextual meanings of the underlined words :

(क) '<u>साधु</u> पृष्टम्, अत्र अनेके प्रमुखोत्सवाः।'

(i) साधुः (ii) उचितम्

(iii) सज्जनः (iv) श्रेष्ठः जनः ।

(ख) 'दुष्टबुद्धिः भित्तौ सन्धिं <u>प्रकल्प्य</u> कलशम् अक्षिपत्।'

(i) कल्पनां कृत्वा (ii) सङ्कल्पं कृत्वा

(iii) रचयित्वा (iv) विकल्पं चित्वा ।

(ग) 'परमहम् अखण्डः <u>शाश्वतः</u> विभुः च।'

(i) नित्यः (ii) सरस्वत्याः

(iii) शिशुवत् (iv) समीचीनः।